SINDHI HIGH SCHOOL, BENGALURU
III Pre–Board Examination - [2025-26]
Subject: संस्कृतम्-L2 (122)
Class: 10 **Max. Marks: 80**
Date: 21.01.2026 **Reading time: 8:30 am to 8:45am**
No.of sides: - 10 **Writing Time: 8:45am to 11:45am**

सामान्यनिर्देशाः -

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 10 पृष्ठानि मुद्रितानि सन्ति ।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति ।
3. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।

'क' खण्डः	अपठितावबोधनम्	10 अङ्काः
'ख' खण्डः	रचनात्मककार्यम्	15 अङ्काः
'ग' खण्डः	अनुप्रयुक्तव्याकरणम्	25 अङ्काः
'घ' खण्डः	पठितावबोधनम्	30 अङ्काः

4. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

'क' खण्डः

अपठितावबोधनम् (10 अङ्काः)

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –

एकदा शीतस्य भीषण: प्रकोप: अभवत् । सम्राट् चन्द्रगुप्त: निश्चितवान् यत् निर्धनेभ्य: कम्बलानां वितरणं भवेत् इति । प्रधानमंत्री चाणक्य: तत्कार्यं स्वीकृतवान् । भृत्या:/सेवका: सर्वान् कम्बलान् तस्य कुटीरे स्थापितवन्तः । रात्रौ केचन चौरा: कम्बलान् चोरयितुं तस्य कुटीरम् प्राविशन्। ते अपश्यन् यत् चाणक्य: एकस्मिन् कटे कम्बलं विना एव सुप्त:। तस्मिन् एव क्षणे चाणक्य: पदध्वनिं श्रुत्वा प्रबुद्धः। चौरा: तम् अपृच्छन् – 'भवतां समीपे कम्बलानां राशि: अस्ति तथापि भवान् कम्बलं विना स्वपिति । 'चाणक्य: अवदत् – 'शृणुत! एते प्रावरका: केवलं निर्धनेभ्य: वितरणार्थम् एव सन्ति । यदि अहम् एतेषु एकं स्वीकरोमि तर्हि अहम् अपि चौरः भविष्यामि' इति । नतमस्तका: चौरा: तस्य पादयो: पतित्वा क्षमायाचनाम् अकुर्वन् ।

अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) **2x1=2**

(i) कम्बलानां वितरणं केभ्य: आसीत्?

(ii) चाणक्य: कम्बलं विना कुत्र शेते स्म?

(iii) एकदा कस्य प्रकोप: अभवत्?

आ. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) **2x2=4**

(i) भृत्या: सर्वान् कम्बलान् कस्य कुटीरे स्थापितवन्त:?

(ii) चौरा: चाणक्यस्य पादयो: पतित्वा किम् अकुर्वन्?

(iii) सम्राट् चन्द्रगुप्त: किम् निश्चितवान्?

इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । **1**

ई. यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयं) **3x1=3**

(i) 'कम्बलस्य' इत्यस्य पदस्य अत्र अन्यत् किम् पर्यायपदं प्रयुक्तम्?

(क) खटस्य (ख) कटे

(ग) प्रावरकस्य (घ) कुटीरे

(ii) 'भविष्यामि' इति क्रियापदस्य कर्तृपदं किम्?

(क) त्वम् (ख) स:

(ग) अहम् (घ) वयम्

(iii) 'केचन' इति पदस्य विशेष्यपदं किम्?

(क) भृत्या: (ख) चौरा:

(ग) जना: (घ) वृद्धा:

(iv) अनुच्छेदे 'दूरे' इत्यस्य पदस्य क: विपर्यय: आगत:?

(क) पार्श्वे (ख) समीपे

(ग) अन्तिके (घ) केचन

'ख' खण्डः

रचनात्मकं कार्यम् (15 अङ्काः)

2. अ- भवान् अविनाशः। शैक्षिकभ्रमणाय अनुमतिं व्ययार्थं धनं च प्रार्थयितुं पितरं प्रति मञ्जूषायाः सहायतया पत्रं लिखतु । **5**

मञ्जूषा

शैक्षिकभ्रमणस्य, स्वाध्याये, प्रथमसत्रीया, प्रतीक्षायाम्, गन्तुम्, , अनुमतिः, पञ्चशतरुप्यकाणि प्रेषयन्तु, शीघ्रातिशीघ्रं, भवान्

अथवा

आ – स्वनाम राघवः इति लिखन् / लिखन्ती स्वविद्यालस्य शौचालयस्य दुरवस्थां वर्णयन् तस्य परिहारार्थं प्रार्थयन् / प्रार्थयन्ती प्रधनाचार्यं प्रति एकं पत्रं लिखतु । **5**

मञ्जूषा

दुर्गन्धः, अशुचिः, जलाभावः, भग्नानि उपकरणानि, स्थलाभावः, अर्गलानाम् अभावः, दोषपूर्णं निर्वहणम्, केषाञ्चन छात्राणां दुर्व्यवहारः

3. अ-प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत - 5x1=5



मञ्जूषा

वनस्य, सिंहः, गजः, वृक्षाः, पादपाः सन्ति, धावन्ति, वृक्षेषु, मृगाः, गर्जति, इतस्ततः, वानराः कूर्दन्ति।

अथवा

आ-मञ्जूषायां प्रदत्तशब्दानां साहाय्येन अधोलिखितं विषयम् अधिकृत्य न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत –

"अतिवृष्ट्या हानिः"

मञ्जूषा

सर्वत्र, जलम्, निमग्नाः, रोगाः, जायते, पशवः, वृक्षाः, जलौघः, नद्यः, नश्यन्ति, जायन्ते

4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत - 5x1=5

(i) तुम सब क्या चाहते हो?

What do you all want?

(ii) सज्जन परोपकार के लिए जीते हैं।

Gentlemen live for helping others.

(iii) माता-पिता का सदैव सम्मान करो ।

Always respect parents.

(iv) कल मैं घूमने के लिए जयपुर जाऊँगा।

Tomorrow I will go to Jaipur for a trip.

(v) परिश्रमी छात्र ही सफलता प्राप्त करते हैं।

Hard working students succeed.

'ग' खण्डः

अनुप्रयुक्तव्याकरणम् (25 अङ्काः)

5.अ- अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- **4x1=4**

(i) **व्याघ्रः + अपि** सहसा नष्टः गलबद्धशृगालकः।

(ii) ते **चक्षुः + नामनी** मते ।

(iii) मानवः **जगदीश्वरे** विश्वसिति ।

(iv) वने **मृगाश्चरन्ति** ।

अथवा

आ-अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- **4x1=4**

(i) हे **हरयागच्छ**

(ii) वैकुण्ठे **हरिः + शेते** ।

(iii) तया एव कीर्तिः **मानो हि** च प्राप्येते ।

(iv) श्यामस्य हृदयं **निः + छलम्** अस्ति।

6.अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - **4x1=4**

(i) **समलं** धरातलम्।

(क) मलस्य सह (ख) मलं सहितम्

(ग) मलेन सहितम् (घ) मलस्य सहितम्

(ii) **रामस्य समीपम्** उपसृत्य प्रणम्य च।

(क) उपरामम् (ख) उपरामः

(ग) उपरामेण (घ) उपरामस्य

(iii) ततः तापसौ **<u>कुशलवौ</u>** प्राविशत: ।

(क) कुश: च लव: च
(ख) लव: च कुशौ च
(ग) लव: च कुशम् च
(घ) लवम् च कुशम् च

(iv) योगी **<u>ध्यानमग्न:</u>** तिष्ठति।

(क) ध्यान: मग्न:
(ख) ध्याने मग्न:
(ग) ध्यानं मग्नं
(घ) ध्यानाय मग्नः

7.अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत - 4x1=4

(i) **<u>भगवान्</u>** वाल्मीकि: वधू: इति।

(क) भग + वन्
(ख) भग + मतुप्
(ग) भग + वान्
(घ) भग + तल्

(ii) यत्रास्ते सा **<u>धूर्त+टाप्</u>** तत्र गम्यताम् ।

(क) धूर्ता
(ख) धूर्त:
(ग) धूर्त**ता**
(घ) धूर्तया

(iii) पर्यावरणस्य रक्षणम् अस्माकं **<u>नैतिकं</u>** कर्तव्यम्।

(क) नीति + ठक्
(ग) नैत् + इक
(ग) नैति + ठक्
(घ) नीति + मतुप्

(iv) **<u>शीलतां</u>** दृष्ट्वा जना: प्रसीदन्ति।

(क) शीलता + म्
(ख) शील + तल्
(ग) शील + त्वम्
(घ) शी + लताम्

8. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखित-वाक्यानि पुनः लिखत - 3x1=3

(i) सः --------- पाठं पठति।

(क) बालकेन
(ग) बालकः
(ख) बालकाय
(घ) बालकम्

(ii) तेन---------पठ्यन्ते ।

(क) पाठाः
(ख) पाठाय
(ग) पाठेन
(घ) पाठे

(iii) राजा सन्मार्गे --------।

(क) गम्यते (ख) गच्छन्ति

(ग) गच्छति (घ) गच्छसि

9.कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत- 4x1=4

(i) छात्र: प्रात: ..... (10:30) गीतानि गायन्ति।

(ii) लता ..... (4:00) ग्रामं गच्छति।

(iii) विवेकः ..... (9:45) पत्रं लिखति।

(iv) उमेशः ..... (6:15) चित्रं रचयति।

10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - 3x1=3

(i) ..... मेघा: वर्षन्ति ।

(ii) ध्वनिं ..... कुरु ।

(iii) भवती अधुना ..... आगच्छति ।

मञ्जूषा

मा कुत: बहि:

11.अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत - 3x1=3

(i) **<u>परिश्रमस्य</u>** विना विद्या न लभते ।

(क) परिश्रमम् (ख) परिश्रम:

(ग) परिश्रमेषु (घ) परिश्रमस्य

(ii) अस्मिन् पुस्तके पञ्चदश **<u>पाठं</u>** सन्ति ।

(क) पाठा: (ख) पाठानि

(ग) पाठे (घ) पाठेन

(iii) त्वं मम मित्रम् **<u>अस्ति</u>** ।

(क) अस्मि (ख) असि

(ग) आसन् (घ) आसीत्

'घ' खण्डः

पठितावबोधनम् (30 अङ्काः)

12.अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –

न्यायाधीशेन पुनस्तौ घटनायाः विषये वक्तुमादिष्टौ। आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यमघटत सः शवः प्रावारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान् मान्यवर! एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि "त्वयाऽहं चोरितायाः मञ्जूषायाः ग्रहणाद् वारितः अतः निजकृत्यस्य फलं भुङ्क्ष्व । अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे" इति । न्यायाधीशः आरक्षिणे कारादण्डमादिश्य तं जनं ससम्मानं मुक्तवान् ।

I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) **2×½ =1**

(i) न्यायाधीशेन पुनः तौ कस्याः विषये वक्तुमादिष्टौ?

(ii) निजपक्षं कः प्रस्तुतवाम्?

(iii) आरक्षिणा कुत्र उक्तम्?

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) **2×1=2**

(i) तत्र किम् आश्चर्यम् अघटत?

(ii) न्यायाधीशः किम् निर्णयम् श्रावितवान् ?

(iii) 'त्वं कति वर्षस्य कारादण्डं लप्स्यसे' इति आरक्षी अवदत्?

III (अ) निर्देशानुसारम् उत्तरत - **2×1=2**

(i) 'भोगं कुरु' इत्यर्थे अत्र किं पर्यायपदं प्रयुक्तम्?

(ii) न्यायाधीशः तं जनं ससम्मानं मुक्तवान् इत्यत्र किं कर्तृपदम् अस्ति?

अथवा

(आ) निर्देशानुसारम् उत्तरत - **2×1=2**

(i) त्वं ---------- लप्स्यसे इत्यत्र किं क्रियापदम् प्रयुक्तम्?

(ii) 'मार्गे' इति पदस्य पर्यायपदं लिखत ।

13.अधोलिखितं पद्यं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - **5**

विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम्।
अश्वश्चेद् धावने वीरः भारस्य वहने खरः।।

I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) **2×½ =1**

(i) धावने क: वीर:?

(ii) संसार: कीदृश: अस्ति?

(iii) कुत्र किञ्चित् निरर्थकं न अस्ति?

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) **2×1=2**

(i) अश्व: कस्मिन् वीर: अस्ति?

(ii) क: विचित्र: अस्ति?

(iii) भारवाहने क: वीर: अस्ति?

III. (अ) निर्देशानुसारम् उत्तरत - **2x1=2**

(i) 'सार्थकम्' अस्य पदस्य क: विपर्यय: श्लोके प्रयुक्त:?

(ii) 'विचित्रे खलु संसारे नास्ति' अस्मिन् वाक्ये क्रियापदं किम्?

अथवा

(आ) निर्देशानुसारम् उत्तरत - **2x1=2**

(i) 'संसारे' इति विशेष्यपदस्य विशेषणपदं किम्?

(ii) 'गर्दभः' इति पदस्य पर्यायपदं लिखत ।

14.अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - **5**

रामः - एष भवतोः सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामि-क्षत्रियकुल-
पितामहयोः सूर्यचन्द्रयोः को वा भवतोर्वंशस्य कर्ता?

लवः - भगवान् सहनदीधितिः।

रामः - कथमस्मत्समानाभिजनौ संवृत्तौ?

विदूषकः - किं द्वयोरप्येकमेव प्रतिवचनम्?

लवः - भ्रातरावावां सोदर्यौ।

रामः - समरूपः शरीरसन्निवेशः। वयसस्तु न किञ्चिदन्तरम्।

लवः - आवां यमलौ।

रामः - सम्प्रति युज्यते। किं नामधेयम्?

लवः - आर्यस्य वन्दनायां लव इत्यात्मानं श्रावयामि (कुशं निर्दिश्य)
आर्योऽपि गुरुचरणवन्दनायाम्.....

कुशः - अहमपि कुश इत्यात्मानं श्रावयामि।

I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) **2×½ =1**

(i) क्षत्रियकुलस्य पितामहौ कौ स्त:?

(ii) रामस्य वंशस्य कर्ता कः?

(iii) कौ भ्रातरौ आस्ताम्?

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) **2x1=2**

(i) समपूपः कः?

(ii) कस्य वन्दनायां लव इत्यात्मानं श्रावयामि?

(iii) कस्य तु न किञ्चिदन्तरम्?

III. (अ) निर्देशानुसारम् उत्तरत - **2x1=2**

(i) 'देवः' पदस्य अर्थे संवादे किं पदं प्रयुक्तं?

(ii) 'अधुना' इत्यर्थे किं पदमत्र प्रयुक्तम्?

अथवा

(आ) निर्देशानुसारम् उत्तरत – **2×1=2**

(i) 'सम्प्रति युज्यते ।' अत्र क्रियापदं चिनुत।

(ii) 'द्वयोः' इति पदं काभ्यां प्रयुक्तम्?

15. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत - **4x1=4**

(i) पुरा त्वया **<u>मह्यम्</u>** व्याघ्रत्रयं दत्तम् ।

(ii) **<u>महानगरेषु</u>** वाहनानाम् अनन्ताः पङ्कत्यः भवन्ति ।

(iii) **<u>अपूर्वं</u>** खलु नामधेयम् ।

(iv) जीर्णः कूपः **<u>ग्रामे</u>** आसीत् ।

16.अ-मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत **4x1=4**

कज्जलमलिनं धूमं मुञ्चति शतशकतीयानम् ।
बाष्पयानमाला सन्धावति वितरन्ती ध्वानम् ।।
यानानां पङ्क्त्यः ह्यानन्ताः कठिनं संसरणम् । शुचिपर्यावरणम्.... ।।

अन्वयः - (अद्यत्वे देशे) शतशकटीयानं **(i)**..... धूमं मुञ्चति, बाष्पयानमाला **(ii)**..... वितरन्ती संधावति। यानानां **(iii)**..... पङ्क्त्यः हि (येन) **(iv)**..... संसरणम्।

मञ्जूषा

कज्जलमलिनं	**ध्वानम्**	**कठिनम्**	**अनन्ताः**

अथवा

आ-मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत –

सेवितव्यो महावृक्षः फलच्छायासमन्वितः।
यदि दैवात् फलं नास्ति छाया केन निवार्यते।।

भावार्थः - अस्य भावः अस्ति यत् संसारे सदैव फलैः छायया च **(i).....** महान् वृक्षः **(ii).....** भवति। यदि दुर्भाग्यवशात् तस्मिन् **(iii).....** नापि भवेयुः तथापि तं **(iv).....** दातुं कश्चित्दपि रोद्धुं न शक्नोति।

मञ्जूषा

फलानि	**युक्तः**	**छायाम्**	**आश्रयितव्यः**

17.अधोलिखित-कथांशं समुचित-क्रमेण लिखत - **8x½=4**

(i) सः अर्थकार्श्येन पदातिरेव प्राचलत्।

(ii) आरक्षी एवं चौरः आसीत् परं अतिथिं चौरं मत्वा सर्वे अभर्त्सयन् ।

(iii) एकः निर्धनः जनः किञ्चिद् धनम् अर्जितवान्।

(iv) न्यायाधीशः शवम् आनेतुम् आदिष्टवान्।

(v) न्यायाधीशः उभाभ्यां विवरणं श्रुतवान्।

(vi) तस्य पुत्रः रुग्णः अभवत् ।

(vii) मार्गे रात्रिः अभवत् गृही च तस्मै आश्रयं प्रायच्छत्।

(viii) न्यायाधीशः आरक्षिणे कारादण्डम् आदिशति।

18.अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत- **3x1=3**

(i) मनः **<u>शोषयत्</u>** तनुः पेषयद् भ्रमति सदा वक्रम्।

(क) शुष्कीकुर्वत् (ख) पिष्टीकुर्वत्

(ग) कुटिलम् (घ) मलिनम्

(ii) सः ऋषभः तम् **<u>उत्थापयितुं</u>** बहुवारं यत्नं अकरोत्।

(क) हलम् ओढुम् (ख) अधः आनेतुम्

(ग) उपरि नेतुम् (घ) वृषभाभ्यां

(iii) गच्छ, गच्छ जंबुक! त्वमपि किञ्चिद् **<u>गूढप्रदेशम्</u>**।

(क) धृष्ट भावात् (ख) गुप्तप्रदेशम्

(ग) विवादम् (घ) गृहम्